श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ५

*विराट् पुरुषोत्पत्तिप्रकारवर्णनं*

व्यक्ताव्यक्तमिदं न किञ्चिदभवत्प्राक्प्राकृतप्रक्षये
मायायाम् गुणसाम्यरुद्धविकृतौ त्वय्यागतायां लयम्।
नो मृत्युश्च तदामृतं च समभून्नाह्नो न रात्रेः स्थितिः
तत्रैकस्त्वमशिष्यथाः किल परानन्दप्रकाशात्मना॥ १ ॥

कालः कर्मगुणाश्च जीवनिवहा विश्वं च कार्यं विभो
चिल्लीलारतिमेयुषि त्वयि तदा निर्लीनतामाययुः।
तेषां नैव वदन्त्यसत्वमयि भो शक्त्यात्मना तिष्टतां
नो चेत् किं गगनप्रसूनसदृशां भूयो भवेत्संभवः॥ २ ॥

एवं च द्विपरार्धकालविगता वीक्षां सिसृक्षात्मिकां
बिभ्राणे त्वयि चुक्षुभे त्रिभुवनी भावाय माया स्वयम्।
मायातः खलु कालशक्तिरखिलादृष्टं स्वभावोऽपि च
प्रादुर्भूय गुणान्विकास्य विदधुस्तस्यास्सहायक्रियाम्॥ ३ ॥

मायासन्निहितोऽप्रविष्टवपुषा साक्षीति गीतो भवान्
भेदैस्तां प्रतिबिंबतो विविशिवान् जीवोऽपि नैवापरः।
कालादिप्रतिबोधिताऽथ भवता संचोदिता च स्वयं
माया सा खलु बुद्धितत्वमसृजद्योऽसौ महानुच्यते॥ ४ ॥

तात्रसौ त्रिगुणात्मकोऽपि च महान् सत्वप्रधानः स्वयं
जीवेऽस्मिन् खलु निर्विकल्पमहं इत्युद्बोधनिष्पादकः।
चक्रेऽस्मिन् सविकल्पबोधकमहन्तत्त्वं महान् खल्वसौ
सम्पुष्टं त्रिगुणैस्तमोऽतिबहुलं विष्णो भवत्प्रेरणात्॥ ५ ॥

सोऽहं च त्रिगुणक्रमात् त्रिविधतामासाद्य वैकारिको
भूयस्तैजसतामसाविति भवन्नाद्येन सत्वात्मना।
देवानिन्द्रियमानिनोऽकृत दिशावातार्कपाश्यश्विनो
वह्नीन्द्राच्युतमित्रकान् विधु विधि श्रीरुद्र शारीरकान्॥ ६ ॥

भूमन्मानसबुद्ध्यहङ्कृतिमिळच्चित्ताख्यवृत्यन्वितं
तच्चान्तःकरणं विभो तव बलात् सत्वांश एवासृजत्।
जातस्तैजसतो दशेन्द्रियगणस्तत्तामसांशात्पुन-
स्तन्मात्रं नभसो मरुत्पुरपते शब्दोऽजनि त्वद्बलात्॥ ७ ॥

शब्दाद्व्योम ततः ससर्जिथ विभो स्पर्शं ततो मारुतं
तस्माद्रूपमतो महोऽथ च रसं तोयं च गन्धं महीम्।
एवं माधव पूर्वपूर्वकलनादाद्याद्यधर्मान्वितं
भूतग्राममिमं त्वमेव भगवन् प्राकाशयस्तामसात्॥ ८ ॥

एते भूतगणास्तथेन्द्रियगणा देवाश्च जाता पृथङ्-
नो शेकुर्भुवनाण्डनिर्मितिविधौ देवैरमीभिस्तदा।
त्वं नानाविधसूक्तिभिर्नुतगुणस्तत्वान्यमून्याविशं-
श्चेष्टाशक्तिमुदीर्य तानि घटयन् हैरण्यमण्डं व्यधाः॥ ९ ॥

अण्डं तत्खलु पूर्वसृष्टसलिलेऽतिष्ठत् सहस्रं समाः
निर्मिन्दन्नकृथाश्चतुर्दशजगद्रूपं विराडाह्वयम्।
साहस्रैः करपादमूर्धनिवहैर्निश्शेषजीवात्मको
निर्भातोऽसि मरुत्पुराधिप स मां त्रायस्व सर्वामयात्॥ १० ॥

**********